दिनाङ्कः- 25.05.2025

प्रातः - 06:55

## प्रधानमन्त्री

प्रधानमन्त्री नरेन्द्र मोदी गतदिने नवदहेल्यां नीत्यायोगस्य दशमे शासकीय परिषदुपवेशने राज्येषु पर्यटनसम्वर्धने बलं दत्तवान्। उपवेशनस्य अध्यक्षतां कुर्वन श्री मोदी विकासक्रमे ‘’एकं राज्यं एकं वैश्विकं गन्तव्यम्’’ इति उपक्रमे बलं दत्तवान्। श्री मोदी समुदीरितवान् यत् एतेन न केवलं पर्यटनं वर्धयिष्यते अपितु नगराणां पर्यटनस्थलरूपे विकासोऽपि भविष्यति।

## नीति आयोग

नवदेहल्यां गतदिने समायोजिते नीत्यायोगस्य शासकीय-परिषद् उपवेशने सर्वाणि राज्यानि सर्वे केन्द्रशासित प्रदेशाश्च ऐक्यभावनायाः अभिव्यक्तिं प्रकटितवन्तः। अथ ‘ऑपरेशन सिन्दूर’ इति भारतीय सैन्याभियाने सशस्त्रबलानां पूर्णरूपेण समर्थनाय अपि भावनां प्रकटितवन्तः। नवदेहल्यां वार्ताहरान् सम्बोधयन् नीत्यायोगस्य मुख्यकार्यकारि-अध्यक्षः ‘’बी वी आर सुब्रह्मण्यम’ इत्यसौ प्रोक्तवान् यत् पहलगाम-स्थले यत् किन्चिदपि जातम्, तेन देशवासिनः आक्रोशिताः आसन् अथ सर्वेः एव अस्माकं रक्षाबलानां शौर्य-पराक्रमवीरतायाः , प्रधानमन्त्रिणः नरेन्द्रमोदिनः नेतृत्वस्य च प्रशंसा कृता। असौ प्रोक्तवान् यत् एतस्मिन् उपवेशने प्रधानमन्त्री बलं दत्तवान् यत् विकसितं भारतम् इति लक्ष्यप्राप्तये तथैव दलीयभावनायाः आवश्यकता, यथा ऑपरेशन सिन्दूर इत्यभियाने प्रकिटता आसीत्।

## मन की बात

प्रधानमन्त्री नरेन्द्र मोदी अद्य प्रातः एकादशवादने आकाशवाण्यां ‘मन की बात इत्येतस्मिन् कार्यक्रमे देशैः वैदेशिकैश्च साकं स्वीयविचारान् विनिमयीकुर्यात्। ‘मन की बात’ इत्येतस्य मासिक-कार्यक्रमस्य एतत् द्वाविंशत्युत्तर-एकशततमं प्रसारणं स्यात्। कार्यक्रमस्य एतस्य प्रसारणं सम्पूर्णे आकाशवाणी-दूरदर्शन तन्त्रे, अथ ए आइ आर फलके, न्यूज ऑन ए आइ आर इत्यत्र च स्यात्। कार्यक्रमस्य सजवं प्रसारणं सूचना-प्रसारण-मन्त्रालयस्य यू ट् यू ब वाहिनीषु अपि श्रोतुं शक्यते। कार्यक्रमस्य एतस्य हिन्दीभाषायां प्रसारणानन्तरं आकाशवाण्याः क्षेत्रीयभाषासु अपि प्रसारणं करिष्यते।

## एनडीए

राष्ट्रिय-जनतांत्रिक-संयुक्ते: एन डी ए इत्येतस्य सर्वे मुख्यमन्त्रिण: उपमुख्यमन्त्रिणश्च अद्य राष्ट्रियराजधान्यां

समायोक्ष्यमाणे विचार-मन्थन-सत्रे भागं स्वीकुर्यु:। सुशासनम् इत्येतद् विषयमभिलक्ष्य एतत् एकदिवसीयं सत्रं भविता। सूत्रानुसारि प्रधानमन्त्री नरेन्द्रमोदी एतस्य उपवेशनस्य अध्यक्षतां विदध्यात्। एतस्मिन् उपवेशने भाजपादलाध्यक्ष: जगत-प्रकाश-नड्डा:, गृहमन्त्री अमित शाह:, रक्षामन्त्री राजनाथ सिंह: नैके पदाधिकारिणश्चापि भागं स्वीकुर्यु:।

## ब्रिक्स

ब्रिक्स इति समूहदेशानां संस्कृतिमन्त्रिणाम् उपवेशनं श्व: प्रभृति ब्राजीलदेशे समायोक्ष्यते। भारतेन अपि एतस्मिन् उपवेशने भागं ग्रहीष्यते। संस्कृति-पर्यटन-मन्त्री गजेन्द्रसिंह शेखावत: भारतीय-प्रतिनिधिमण्डलस्य अत्र नेतृत्वं विद्यास्यति।

## आईपीएल

इण्डियन-प्रीमियर-लीग् इत्येतस्यां क्रिकेट-लीग-प्रतिस्पर्धायां गतदिने क्रीडिते द्वन्द्वे 'देहली कैप्टिल्स' इत्येतेन दलेन 'पंजाब किंग्स' इति दलं षट्स्तोभपुरस्सरं पराजितम्।

प्रतिस्पर्धायाम् अद्य गुजरात टाइटंस-चैन्नई सुपर किंग्स इत्येतयो: दलयो: मध्ये मध्याह्ने सार्धत्रिवादने द्वन्द्व स्यात्, अथैव अपरे द्वन्द्वे सनराइजर्स हैदराबाद- कोलकाता नाइटराइडर्स इत्येतयो: दलयो: मध्ये सायं सार्धसप्तवादने द्वन्द्वं भवेत्।